# আপদুদ্ধারক শ্রীহনূমৎস্তোত্রম্

{॥ আপদুদ্ধারক শ্রীহনূমৎস্তোত্রম্ ॥}

বিভীষণকৃতম্

শ্রীহনুমতে নমঃ । অস্য শ্রীহনুমৎস্তোত্রমহামন্ত্রস্য, বিভীষণ

ঋষিঃ, অনুষ্টুপ্ ছন্দঃ, হনুমান্ দেবতা । মম শত্রুমুখস্তম্ভনার্থে

সর্বকার্যসিদ্ধ্যর্থে চ জপে বিনিয়োগঃ ।

ধ্যানম্

চন্দ্রাভং চরণারবিন্দযুগলং কৌপীনমৌঞ্জীধরং

নাভ্যাং বৈ কটিসূত্রযুক্তবসনং যজ্ঞোপবীতাবৃতম্ ।

হস্তাভ্যামবলম্ব্য চাঞ্জলিমথো হারাবলীকুণ্ডলং

বিভ্রদ্দীর্ঘশিখং প্রসন্নবদনং দিব্যাঞ্জনেযং ভজে ॥

মন্ত্রঃ-ওঁ নমো হনুমতে রুদ্রায ।

মম সর্বদুষ্টজনমুখস্তম্ভনং কুরু কুরু ॥

মম সর্বকার্যসিদ্ধিং কুরু কুরু । ঐং হ্রাং হ্রীং হ্রূং ফট্ স্বাহা ।

note অষ্টবারং জপেত্ ।

আপন্নাখিললোকার্তিহারিণে শ্রীহনূমতে ।

অকস্মাদাগতোৎপাতনাশনায নমোঽস্তু তে ॥ ১॥

সীতাবিযুক্তশ্রীরামশোকদুঃখভযাপহ ।

তাপত্রযস্য সংহারিন্নাঞ্জনেয নমোঽস্তু তে ॥ ২॥

আধিব্যাধিমহামারিগ্রহপীডাপহারিণে ।

প্রাণাপহন্ত্রে দৈত্যানাং রামপ্রাণাত্মনে নমঃ ॥ ৩॥

সংসারসাগরাবর্তাগতসম্ভ্রান্তচেতসাম্ ।

শরণাগতমর্ত্যানাং শরণ্যায নমোঽস্তু তে ॥ ৪॥

রাজদ্বারে বিলদ্বারে প্রবেশে ভূতসঙ্কুলে ।

গজসিংহমহাব্যাঘ্রচোরভীষণকাননে ॥ ৫॥

মহাভযেঽগ্নিসংস্থানে শত্রুসঙ্গসমাশ্রিতে ।

শরণাগতমর্ত্যানাং শরণ্যায নমো নমঃ ॥ ৬॥

প্রদোষে বা প্রভাতে বা যে স্মরন্ত্যঞ্জনাসুতম্ ।

অর্থসিদ্ধিযশঃকামান্ প্রাপ্নুবন্তি ন সংশযঃ ॥ ৭॥

কারাগৃহে প্রযাণে চ সঙ্গ্রামে দেশবিপ্লবে ।

যে স্মরন্তি হনূমন্তং তেষাং নাস্তি বিপত্তযঃ ॥ ৮॥

বজ্রদেহায কালাগ্নিরুদ্রাযামিততেজসে ।

নমঃ প্লবগসৈন্যানাং প্রাণভূতাত্মনে নমঃ ॥ ৯॥

দুষ্টদৈত্যমহাদর্পদলনায মহাত্মনে ।

ব্রহ্মাস্ত্রস্তম্ভনাযাস্মৈ নমঃ শ্রীরুদ্রমূর্তযে ॥ ১০॥

জপ্ত্বা স্তোত্রমিদং পুণ্যং বসুবারং পঠেন্নরঃ ।

রাজস্থানে সভাস্থানে বাদে প্রাপ্তে জপেদ্ধ্রুবম্ ॥ ১১॥

বিভীষণকৃতং স্তোত্রং যঃ পঠেত্ প্রযতো নরঃ ।

সর্বাপদ্ভ্যো বিমুচ্যেত নাত্র কার্যা বিচারণা ॥ ১২॥

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Apaduddharaka Hanumath Stotram Lyrics in Bengali PDF
% File name : ApaduddhArakahanUmatstotram.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 19, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website